दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

himsanskritvartah
e-Sanskritnewspaper

नवा प्रेरणा नवोत्साहः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-3 ■ अङ्क-72

1

05.01.2024 शुक्रवासरः वि.सं. २०८० पौषकृष्णः नवमी पौषः 21 प्रविष्टांशः

Website- www.himsanskritam.com Emai l-himsanskrit@gmai l.com


चिकित्सामहाविद्यालये हमीरपुरे भवेत् राज्य- कर्करोग- संस्थानम्, मुख्यमन्त्री

2


द्वितीये दिने एव समाप्ता टेस्ट प्रतिस्पर्धा भारतेन विजिता दक्षिण अफ्रीका विरुद्धं द्वितीया टेस्ट क्रिकेट स्पर्धा

3


श्रीभगवता परमात्मना स्वस्यैव क्रीडार्थं विश्वप्रकृतिः कल्पिता, रचिता च। प्रकृतिः नाम महाशक्तिः

4


## आरक्षी- महानिदेशकानां महानिरीक्षकाणां च अखिल-भारतीय-सम्मेलने भागं भजिष्यति



प्रधानमन्त्री नरेन्द्रमोदी जनवरी- मासस्य षट्-सप्त दिनांकयोः जयपुरस्य राजस्थान- अन्ताराष्ट्रिय- केन्द्रे आरक्षी- महानिदेशकानां महानिरीक्षकाणां च त्रयोविंशत्यधिक-द्विसहस्र-वर्षस्य अखिल-भारतीय-सम्मेलने भागं भजिष्यति। त्रि-दिवसीयं सम्मेलनं अद्य आरप्स्यते। सम्मेलनावधौ साइबर- अपराधे, प्रौद्योगिक्यां, आततायिनां विरुध्य समस्यासु, वामपन्थोग्रवादे, कारागृह- संवर्धने आरक्षि-व्यवस्थायां च चर्चा भविष्यति। सम्मेलनस्य कार्य-सूच्यां नूतनापराधिक- विधीनां योजनाय रूपेरखासु अपि चर्चा सम्मिलितास्ति। आरक्षि- सुरक्षा- व्यवस्थयोः आर्टिफिशियल- इंटेलिजेंस, डीप-फेक इत्येतयोः नव प्रौद्योगिक्योः जनित-समस्याभिः निदानाय चर्चा करिष्यते।

## भारतं 2027 यावत् द्विदल-क्षेत्रे आत्मनिर्भरं भविष्यति- अमित-शाहः



केन्द्रीय- सहकारिता- मन्त्री अमित-शाहः अवोचत् यत् भारतं सप्तविंशत्यधिक द्विसहस्रवर्षं यावत् द्विदल-क्षेत्रे आत्मनिर्भरं भविष्यति, अमुनोक्तं यत् सम्प्रति भारतं मुद्ग-चकयोः क्षेत्रे आत्मनिर्भरं सञ्जातम्, परमद्यापि राष्ट्रम् अन्येषां द्विदलधान्यानाम् आयातं करोति, राजधान्यां नवदिल्ल्याम् तुअर द्विदलोत्पादकानां कृषकाणां पञ्जीकरण -क्रय-धन- प्रदानाय च अन्तर्जाल-पटलस्य लोकार्पणावसरे शाहेन इदं प्रोक्तम्, विगतेषु नव वर्षेषु प्रधानमन्त्रिणा नरेन्द्रमोदिना द्विदलानाम् उत्पादनं समेधितुं नैके पदक्षेपा विहिताः, अपि च उक्तं यत् प्रशासनं समेभ्यः पञ्जीकृत-कृषकेभ्यः न्यूनतम समर्थन मूल्ये द्विदलानां क्रयणं करिष्यति, यतोहि कुपोषणं वारयितुं द्विदलानां महत्वपूर्णा भूमिका वर्तते।

## बाङ्गलादेशे अग्रिम-रविवासरे राष्ट्रियनिर्वाचनम्



अस्मिन् रविवासरे बाङ्गलादेशे राष्ट्रियनिर्वाचनं भविष्यति। त्रिंशतम् आसनानां कृते सप्तत्याधिक-नवशतोत्तरैक- सहस्राणां (१९७०) अभ्यर्थिनां भाग्यस्य निर्णयं प्रायः ऊनविंशत्यधिकैकशतोत्तर लक्षं यावत् मतदातारः करिष्यन्ति। सत्तारूढः अवामी-लीग इति दलं चतुर्थं कार्यकालं प्राप्तुं षड्षष्ठयोत्तर द्विशतं (२६६) आसनेषु प्रतिस्पर्धा कुर्वन् अस्ति। शेखहसीनायाः नेतृत्वे अवामीलीग इति दलं नवोत्तर द्विसहस्रतम वर्षात् सत्तायां विद्यते। संसदि मुख्यविपक्षदलेन जटियापार्टी इत्यनेन पञ्चषष्ठ्योत्तर द्विशतं प्रत्यशिनां नामांकनं कृतम् अस्ति।

## प्रशासनेतर-समवायाभ्यां रक्षोपकरणानां क्रयेण रक्षाक्षेत्रे आत्मनिर्भर-भारतस्य दृष्टिकोणं दृढीभवति- रक्षामन्त्रालयः

रक्षा मन्त्रालयेन राजधान्यां नवदिल्ल्याम् द्वयोत्तर-अष्टशत कोटि-रूप्यकाणाम् रक्षोपकरणानि क्रेतुं सन्धिद्वयं हस्ताक्षरैः प्रमाणितम्। इमे सन्धिद्वयं जुपिटर वेगन्स् लिमिटेड अथ भारत अर्थ मूवर्स लिमिटेड समवायाभ्याम् सह कृतम्। रक्षा मन्त्रालयेन उक्तं यत् प्रशासनेतर- समवायाभ्यां रक्षोपकरणानां क्रयेण रक्षाक्षेत्रे आत्मनिर्भर-भारतस्य दृष्टिकोणं दृढीभवति।

## नेपाल-भारताभ्यां महत्त्वपूर्ण-सन्धिद्वये हस्ताक्षराणि कृतानि



नेपाल-भारत-संयुक्तायोगस्य सप्तमोपवेशने भाग-ग्रहणाय विदेशमन्त्रिणः एस. जयशंकरस्य नेतृत्वे भारतीय- प्रतिनिधि- मण्डलं काठमांडू नगरम् सम्प्राप्तवान्। त्रिभुवन- अन्ताराष्ट्रिय- विमान-स्थानकं सम्प्राप्य नेपालस्य विदेश-मन्त्रिणा नारायण प्रसाद-सऊद इत्यनेन सर्वकारस्य वरिष्ठाधिकारिभिः साकं डॉ. जयशंकरस्य स्वागतं विहितम्। देशद्वयेन महत्त्वपूर्ण-सन्धिद्वये हस्ताक्षराणि कृतानि। प्रथमा सन्धि दीर्घकालिक- विद्युत्- सम्बद्धा अस्ति। द्वितीय-सन्धौ च उच्चप्रभाव- सामुदायिक- विकास-परियोजनासु निवेश-संवर्धने साहमत्यं प्रकटितम्। इतः परं विदेशमन्त्री द्विपक्षीय- सम्बन्धानां स्थितेः समीक्षां विधास्यति। सः नेपालस्य राष्ट्रपतिना रामचन्द्र पौडेलेन, प्रधानमन्त्री पुष्प कमल दहल इत्यनेन सह मेलनं करिष्यति अपि च परस्पर-हित-विषयेषु चर्चां करिष्यतः। संयुक्तायोगस्य उपवेशने उभौ विदेश-मन्त्रिणौ संयुक्त-रूपेण नेपाल-भारतयोः सीमायां ट्रांसमिशन- लाइन इत्येतेषाम् उद्घाटनं करिष्यतः।

## दिल्ल्याः उप-राज्यपालेन दिल्ली-सर्वकारस्य अधिकारि-द्वयं विरूध्य सी.बी.आई. निरीक्षणस्य आदेशः प्रदत्तः




दिल्ल्याः उप-राज्यपालेन वी. के. सक्सेना इत्यनेन दिल्ली-सर्वकारस्य अधिकारि-द्वयं विरूध्य सी.बी.आई. इत्यनेन निरीक्षणस्य आदेशः प्रदत्तः। उभयोः अधिकारिणोः उपरि त्रयोविंशत्यधिक द्वि-शतं कोटि रूप्यकाणां कथित भ्रष्टाचारस्य आरोपः वर्तते। उभौ अधिकारिणौ वन-वन्य-जीव- विभागे आस्ताम्। आरोपमस्ति यत् उभौ कूट-पत्रस्याधारेण विभागस्य कोषात् त्रयोविंशत्यधिक- द्वि-शतं रूप्यकाणां हस्तान्तरणम् अन्यस्मिन् संरक्षण-कूट-वित्तकोषे कृतवन्तौ । श्रीसक्सेनया अस्य प्रकरणस्य निरीक्षणं भ्रष्टाचार निरोध-विध्यान्तर्गतं कारयितुं सी.बी.आई. इत्यस्य प्रस्तावः स्वीकृतः।

## धर्मसंस्कृतिः

### हंसराज-रघुवंशी द्वारा गीते राम-भक्ति-परं गीतं सामाजिक- सञ्चार-पटले उपस्थापयत्प्रधानमन्त्री नरेन्द्र मोदी



हंसराज-रघुवंशी द्वारा गीते राम-भक्ति परं गीतं सामाजिक- सञ्चार-पटले उपस्थापयत्। प्रधानमन्त्रिणा उक्तं यत् सम्पूर्ण-राष्ट्रं भगवतः श्रीरामस्य आयोध्यायां स्वागताय हर्षपूरितं वर्तते। अपि च प्रधानमन्त्री अवोचत् यत् भक्ताः निजभावान् प्रकटयन्ति आनन्दं च अनुभवन्ति। तेन जनाः अपि भक्ति-गीत-श्रवणाय अध्यर्थिताः।



चिन्तपुर्णी मन्दिरम्, ऊना हि.प्र.

### सुभाषितम्

धारणाद्धर्ममित्याहुः
धर्मो धारयत प्रजाः।
यस्याद्धारणसंयुक्तं
स धर्म इति निश्चयः॥

भावार्थ- "धर्म" शब्द की उत्पत्ति "धारण" शब्द से हुई है (अर्थात् जिसे धारण किया जा सके वही धर्म है), यह धर्म ही है जिसने समाज को धारण किया हुआ है। अतः यदि किसी वस्तु में धारण करने की क्षमता है तो निस्सन्देह वह धर्म है।

**सूचना-** हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति


कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

# नारीशक्ति-सम्मान-समारोहे राज्यपालेन पुरस्कृता उत्कृष्टकार्यकर्तर्यः महिलाः



**हिमसंस्कृतवार्ता- शिमला।** अमर-उजाला इत्यस्य नारी- शक्तिसम्मानसमारोहः-२०२४ इत्यस्य आयोजनं गुरुवासरे ईस्टबोर्नरिजॉर्ट- खलीनी शिमला इत्यस्य सभागारे अभवत्। अस्मिन् समारोहे हिमाचलस्य राज्यपालः शिवप्रतापशुक्लः मुख्यातिथिः आसीत् । अस्मिन्नवसरे राज्यपालः हिमाचले विविधक्षेत्रेषु उत्तमकार्यं कुर्वतीनां महिलानां सम्मानं कृतवान् । अभिनन्दनसमारोहे शिक्षा, चिकित्सा, उद्यम, क्रीडा, कला, लोकसंस्कृतिः, कृषिः, पर्यावरणं, समाजसेवा सहित विभिन्नक्षेत्रेभ्यः अग्रणीमहिलानां चयनं कृतम्। समारोहे अन्ताराष्ट्रीय-कबड्डी-क्रीडिकाः पुष्पराणा, निधि शर्मा, ज्योति ठाकुर सहिताः अनेकाः सुप्रसिद्धाः महिलाः पुरस्कृताः। प्रथमवारं हिमाचले अमर-उजाला वार्तासमूहेन नारीशक्ति- सम्मान-समारोहस्य आयोजनं कृतम्।
पूर्वं उत्तरप्रदेशे उत्तराखण्डे च एतादृशाः कार्यक्रमाः आयोजिताः। अस्य आयोजनस्योद्देश्यं हिमाचलस्य महिलाशक्तिं समाजस्य सर्वेषु क्षेत्रेषु अग्रे गन्तुं प्रोत्साहयितुं आसीत् । कार्यक्रमस्य मुख्यः प्रायोजकः काङ्गड़ाजनपदस्य इन्दौराक्षेत्रस्य काठगढस्य अरणीविश्वविद्यालयः आसीत् । यत्र सहप्रायोजकाः तारादेवी एन्क्लेव शिमला, रूट्स-कण्ट्री-विद्यालयः बाघी, बड्डु साहिबविश्वविद्यालयः, बहाराविश्वविद्यालयः, महाराजा- अग्रसेनविश्वविद्यालयः बद्दी, इकफाई विश्वविद्यालयः, एलआर-ग्रुप-आफ-इंस्टीट्यूट-सोलनम्, लॉर्ड-महावीर-नर्सिंग-महाविद्यालयः नालागढ़म्, नैनानर्सिंगमहाविद्यालयः मंडी, मुरारीलालनर्सिंगमहाविद्यालयः सोलनम् आर्यविद्यालयः भोटा, मिन्ची- खाद्योत्पाद शोघी, क्योरटेक-फॉर्मूलेशन- सोलनम्, हिमालयन-महाविद्यालयः काला-अंबम् आईएएमडी सोलनम्, रॉयल-अकादमी पालमपुरम्, ओरिसन-हेल्थ-कुल्लूः अपि च नीनू-मीडिया-शिमला च आसन् । अस्मिन् काले सांस्कृतिकप्रस्तुतिभिः उपस्थितानां मनोरञ्जनमपि अभवत् ।

# चिकित्सामहाविद्यालये हमीरपुरे भवेत् राज्य- कर्करोग- संस्थानम्, मुख्यमन्त्रिणा केंद्रीयस्वास्थ्यमंत्रिणः समक्षं निवेदितम्





**हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः गुरुवासरे नवदेहल्यां केन्द्रीय- स्वास्थ्य- परिवार- कल्याणमन्त्रिणा डॉ. मनसुखमांडवियावर्येण सहामिलत्। मुख्यमन्त्रिणा केन्द्रीयमन्त्रिणः आग्रहः कृतः यत् कर्करोगः, मधुमेहः, सीबीडी, आघातनिवारणं च आघातनियन्त्रणस्य राष्ट्रीयकार्यक्रमस्य अन्तर्गतं डॉ. राधाकृष्णनराजकीय- चिकित्सामहाविद्यालये हमीरपुरे प्राथमिकतायाः आधारेण राज्यकर्करोगसंस्थानस्य स्थापना भवेत्। सः अवदत् यत् राज्ये कर्करोगस्य वर्धमानं दरं दृष्ट्वा एतस्य संस्थानस्य स्थापना आवश्यकी अस्ति।
मुख्यमन्त्री प्रधानमन्त्रिस्वास्थ्यसंरक्षणयोजनायाः अन्तर्गतं डॉ. राधाकृष्णनराजकीय चिकित्सामहाविद्यालये, हमीरपुरे सुपरस्पेशलिटी खण्डस्य निर्माणस्य अपि अनुरोधं कृतवान्। सः केन्द्रीयमन्त्रीं सूचितवान् यत् राज्ये जनानां कृते सामुदायिकप्राथमिकस्वास्थ्यकेन्द्रद्वारा स्वास्थ्यसेवाः प्रदत्ताः सन्ति। राज्यसर्वकारः ग्रामीणस्तरस्य स्वास्थ्यसंरचनायाः सुदृढीकरणं कुर्वन् अस्ति। सः अवदत् यत् राज्यसर्वकारः सुपरस्पेशियलिटी- आधारभूतसंरचनायाः सुदृढीकरणाय अपि कार्यं कुर्वन् अस्ति। डॉ. राधाकृष्णनराजकीय चिकित्सामहाविद्यालये, हमीरपुरे इत्यस्मिन् मातृ-बाल-अस्पताल-प्रकोष्ठस्य क्षमतां १०० शय्याभ्यः २०० शय्याभ्यः यावत् वर्धयितुं अपि सः अनुरोधं कृतवान्।
मार्गदुर्घटनायां यात्रिकाणां पर्यटकानाञ्च समये-समये आपत्कालीनस्वास्थ्यसेवाप्रदानार्थं मुख्यमन्त्री चण्डीगढ़- मनाली राष्ट्रिय राजमार्गे स्थिते घुमारवींस्थे नागरिकचिकित्सालयाय नेरचौकस्य श्रीलालबहादुरशास्त्री- राजकीय- चिकित्सा- महाविद्यालयाय च परवाणु-शिमला-राष्ट्रीये राजमार्गे स्थिते नागरिकचिकित्सालयाय धर्मपुराय, पठानकोट- मण्डी राष्ट्रीयराजमार्गे स्थिते नागरिकचिकित्सालयाय पलामपुराय चतुर्णाम् आघात-केन्द्राणां अनुमोदनं कर्तुं अपि निवेदनं कृतवान्। मुख्यमन्त्री चम्बा, हमीरपुरं, नाहनम् इत्यत्र त्रयाणां परिचारिका (नर्सिंग) महाविद्यालयानां स्थापनार्थं आवश्यक-स्वीकृतिं, धनं च प्रदातुं प्रक्रियां शीघ्रं कर्तुम् आग्रहं कृतवान्। केन्द्रीयमन्त्री राज्याय सर्वसम्भवसहायतां प्रदातुम् आश्वासनं दत्तवान्। अस्मिन्नवसरे मुख्यमंत्रिणः प्रधानसचिवः भरतखेड़ा, आवासीयआयुक्त मीरा मोहंती, मुख्यमंत्रिणः प्रधाननिजीसचिवः विवेक भाटिया अपि उपस्थिताः आसन्।

# हिमाचलम् आगमिष्यति उपराष्ट्रपतिः ६ जनवरी दिनाङ्के राष्ट्रीय-प्रौद्योगिकी-संस्थानम्, हमीरपुरस्य करिष्यति प्रवासः



**हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।**
उपराष्ट्रपतिः जगदीपधनखड़ः ६ जनवरी दिनाङ्के हिमाचलप्रदेशस्य भ्रमणं कृत्वा अनेकेषु कार्यक्रमेषु भागं ग्रहीष्यति। उपराष्ट्रपतिसचिवालयेन गुरुवासरे अत्र उक्तं यत् उपराष्ट्रपतिः एकदिवसीययात्रायाम् राष्ट्रियप्रौद्योगिकीसंस्थानम् (एनआईटी) हमीरपुरं गमिष्यति। सः विकसितभारते यूनां भूमिका-२०४७ इति विषये छात्रान् सम्बोधयिष्यति। सः छात्रैः सह अपि अन्तःक्रियां करिष्यति। हिमाचलप्रदेशे शिक्षायाः उपलब्धतां वर्धयितुं प्रयतमानस्य उपक्रमस्य एकतः श्रेष्ठस्य ५०० तमस्य केन्द्रस्य उद्घाटनसमारोहे अपि उपराष्ट्रपतिः मुख्यातिथिः भविष्यति। अस्मिन् अवसरे उपराष्ट्रपतिः बालकैः सह अन्तरक्रियासत्रे अपि भागं ग्रहीष्यति।




# गिरिपारस्य हाटीजनेभ्यः जनजातीयपदवीं दातुं विधौ उच्चन्यायालयस्य प्रतिबन्धः

**हिमसंस्कृतवार्ता- शिमला।** हिमाचलप्रदेश उच्चन्यायालयेन सिरमौरमण्डलस्य गिरिपारक्षेत्रस्य हाटीभ्यः जनजातीयपदवीं दातुं सम्बद्धस्य विधेः कार्यान्वयनस्य स्थगनं कृतम् अस्ति। राज्यस्य जनजातीयविकासविभागेन २०२४ तमस्य वर्षस्य जनवरीमासे प्रथमेऽद्दिनाङ्के प्रसारितं पत्रम् अपि न्यायालयेन स्थगितम् अस्ति, यस्य अन्तर्गतं उपायुक्तं सिरमौरं क्षेत्रस्य जनानां कृते जनजातीयप्रमाणपत्राणि निर्गन्तुं आदेशाः निर्गताः आसन्। मुख्यन्यायाधीशः एम.एस.रामचन्द्ररावस्य, न्यायाधीशस्य ज्योत्स्नारिवाल दुआ इत्यस्याः च विभागपीठेन अन्तरिम-आदेशे स्पष्टं कृतम् यत् यदा केन्द्रसर्वकारेण पूर्वमेव एतत् विषयं त्रिवारं अस्वीकृतम् आसीत्, तदा विधौ किं अवशिष्टम् यत् केन्द्रेण गिरिपार-क्षेत्रस्य जनाः जनजातीयाः इति घोषयितुं विधिनियमः निर्मातव्यः आसीत्।
न्यायालयेन जनजातीयक्षेत्रस्य स्थितिं विधिपूर्वकं दातुं प्राथमिकदृष्ट्या न्यायोचितं न ज्ञातम् । उक्तक्षेत्रं जनसंख्यासर्वेक्षणं विना जनजातीयक्षेत्रं घोषितम् इति याचिकायां आरोपः कृतः अस्ति। ते पूर्वमेव अनुसूचितजनजातेः अनुसूचितजातेः च सन्ति इति पृथक् पृथक् याचिकासु तर्कः कृतः अस्ति । राज्ये हाटीजनजातिः नास्ति तथा च उच्चजातीयजनानाम् आरक्षणस्य अधिकारः अपि हाटीनाम्ना दत्तः, यत् विधिवत् अनुचितम् अस्ति। समुदायस्य नाम्ना कोऽपि भौगोलिकक्षेत्रं यावत् सः मापदण्डं न पूरयति तावत् अनुसूचितजनजातिः इति घोषितुं न शक्यते।
देशे आरक्षणनीत्यानुसारं अनुसूचितजनजातिः अनुसूचितजातिः अन्यपृष्ठवर्गः च पूर्वमेव विद्यमानविधानानुसारं क्रमशः १५, २७ च प्रतिशतं आरक्षणं प्राप्नोति। १९९५, २००६, २०१७ वर्षेषु गिरिपार-जनानाम् जनजातीयक्षेत्रस्य स्थितिं दातुं केन्द्रसर्वकाराय प्रस्तावः प्रेषितः । केन्द्रसर्वकारेण प्रतिवारं मुख्यकारणत्रयेण एतत् प्रकरणं नाङ्गीकृतम् आसीत् । एतेषु एकं कारणं उक्तक्षेत्रस्य जनसंख्यायां एकरूपतायाः अभावः इति उक्तम्, द्वितीयं हाटीशब्दः सर्वान् निवासिनः आच्छादयति इति व्यापकः पदम् अस्ति यदा तु तृतीयं कारणं यत् हाटी कस्यापि जातीयसमूहं निर्दिष्टं न करोति इति।

# विज्ञानस्य सर्वेषां सूत्राणां मूलं संस्कृते एव निहितं वर्तते - डॉ. वाचस्पतिः मिश्रः




**हिमसंस्कृतवार्ताः - सचिनशर्मा, मोदीनगरम् , गाजियाबादः, उप्र.।** संस्कृतभारती मेरठप्रान्तेन प्रेसीडेन्सी पब्लिक स्कूल इत्यस्मिन् विद्यालये शताब्दीनगरे संस्कृतं जनभाषां कर्तुम् आन्दोलनाय सप्तदिवसीयः भाषाप्रबोधनवर्गः आयोजितः। वर्गेऽस्मिन् मेरठम्, सहारनपुरम् , मुरादाबादम् च इत्यादिनां मण्डलानां अनेकेभ्यः स्थानेभ्यः प्रायशः शताधिकाः प्रतिभागिनः प्रतिभागं कृतवन्तः। वर्गेऽस्मिन् संस्कृतभाषां व्यवहारिकीभाषां कर्तुं वार्तालापस्य भाषां कर्तुं च अभ्यासः कृतः। वर्गे आगतानां प्रतिभागिनां कृते संस्कृतं विहाय अन्यया भाषया वार्तालापाय अवसरः न भवति, अनेन कारणेन शिक्षार्थिनां विचारः संस्कृतेन एव सम्भवति । अस्य वर्गस्य समापनकार्यक्रमे शिक्षार्थिभिः वर्गे प्राप्तकौशलानां प्रदर्शनं नाटकेन अनुभवकथनेन सम्भाषणेन च इत्यादि माध्यमेन कृतम्। वर्गाधिकारी आई आई टी रुडकीतः सेवानिवृत्तः प्रो. दिनेशकुमारमहोदयेन संस्कृत व्यवहारिकी भाषा भवेत् इति एषः आग्रहः कृतः। संस्कृतभारती मेरठप्रान्तस्य अध्यक्षः प्रो० पवनकुमारशर्मा उक्तवान् यत् संस्कृतं केवलं भाषा एव न अपितु जीवनदर्शनं वर्तते। संस्कृतं विश्वस्य सर्वस्पष्टी भाषा वर्तते, यस्मिन् पूर्णविरामः,अर्धविरामः,विसर्गः,अनुस्वारः, हलन्त् इत्यादीनां सर्वेषां स्वस्य उच्चारणस्थानं वर्तते।अस्य स्पष्टतायाः कारणेन नासा इत्यादि संस्था AI (ए आई) अनेकायै विधायै भविष्ये संस्कृतभाषामेव अनिवार्यतया मन्यन्ते। संस्कृते एकस्य शब्दस्य एव अनेकानां पर्यायशब्दानां अर्थः भिन्नः विशिष्टश्च भवति। संस्कृतभाषायाः पञ्चशताधिकशब्दाः विश्वस्य अन्यासु भाषासु गताः। आंग्लभाषायां गणना ट्रिलियन पर्यन्तं भवति परन्तु संस्कृते तु महाशंख पुनश्च अनन्त पर्यन्तं भवति। बिग बैंग थ्योरि इत्यस्य सूत्रं ऋग्वेदस्य नासदीयसूक्ते, हिरण्यगर्भसूक्ते पुरुषसूक्ते च अस्ति। नासदीयसूक्ते सृष्ट्योत्पत्तिः, हिरण्यगर्भसूक्ते सृष्टेः परवर्तीविकासः पुरुषसूक्ते च सामाजिक विकासस्य वर्णनमस्ति। सर्वे शिक्षार्थिनः संस्कृतेन वार्तालापं कर्तुं तथा अन्यान् अपि बोधयितुं शपथं गृहीतवन्तः। क्षेत्रसम्पर्कप्रमुखः डॉ.वाचस्पतिमिश्रवर्यः अपि सर्वेषां छात्राणां मार्गदर्शनं कृतवान्। प्रातःकाले दीक्षान्तसमारोहेण सह वर्गः समाप्तः। वर्गेऽस्मिन् प्रान्तसङ्घटनमन्त्री योगेशविद्यार्थी,प्रान्तमन्त्री प्रभाकरमणित्रिपाठी, प्रशिक्षणप्रमुखः सचिन शर्मा , प्रान्तसहमन्त्री डॉ संदीप कुमार ,डॉ.लक्ष्मण सिंह ,पुनीतआर्य, मनेन्द्रः,आकाशः,रुद्रांशः,रक्षिता,रामांशः,विनीतः,दीपांशी, खुशी, तरुणः,रंगराजन,नैन्सी,अंशः, मोहितः,अभिषेकः,कोमल इत्यादि शिक्षकैः सह शताधिकाः छात्राः अपि उपस्थिताः आसन्।

# बञ्जरियाप्रखण्डस्य गृहे-गृहे अक्षतवितरणम्




रामजन्मभूमिप्राणप्रतिष्ठा-आमन्त्रणसमित्याः तत्वावधाने अजगरी मठात् प्रारब्धा पवित्रकलशयात्रा अमवासिसवा शनीचरीस्थानं भूत्वा गोखुलामठे समाप्ता। अस्मिन्नावसरे गगनचुम्बितैः श्रीजयरामस्योद्घोषैः समस्तक्षेत्रस्य वातावरणं गुञ्जितः अभवत्, सर्वत्र ग्रामीणैः पुष्पवृष्टिः कृता, यात्रायां अधिकसंख्यायां महिलानां प्रतिनिधित्वमासीत्। शोभायात्रायाः प्रतिनिधित्वं जिलासदस्यौ आलोकचन्द्रः मनोरंजनप्रसादः च कृतवन्तौ, तत्रैव हरेन्द्रप्रसादोऽप्यासीत्। अस्मिन् अवसरे प्रमोदशंकरसिंहः पूर्व एमएलसी मोतिहारी बबलू गुप्ता अपि शोभायात्रायां भागं गृहीतवान्। गोखूला मठे जनान् सम्बोधयन् विहिप नेता अशोकश्रीवास्तवः अधिवक्ता अवदत् यत् राममन्दिरस्य अभिषेकः २२ जनवरी दिनाङ्के भवति। एतत् केवलं राममन्दिरं न अपितु राष्ट्रमन्दिरम् अस्ति। 1 जनवरीतः 15 जनवरीपर्यन्तं कार्यकर्तारः अक्षतान् आमन्त्रणपत्रकानि च गृहीत्वा सर्वेषु गृहेषु गत्वा अयोध्या दर्शनार्थम् आमन्त्रयिष्यन्ति। ते उक्तवन्तः यत् 22 जनवरी दिनाङ्के अयोध्यां न गच्छन्तु 22 जनवरी दिनाङ्कात् परं सर्वैः अयोध्या भ्रमणं कर्तव्यम्। 22 जनवरी दिनाङ्के दीपैः स्वगृहाणि अलङ्कृत्य दिवाली-उत्सवं कुर्वन्तु, मठ-मन्दिरेषु च भजन-कीर्तनं कुर्वन्तु यतोहि एषः शुभसमयः ५०० वर्षाणाम् अनन्तरम् आगतः ।

अस्मिन् अवसरे समितिसदस्यः पूर्वजिल्लासंयोजकः च बजरंगदलः आलोकचन्द्रः अधिवक्ता अवदत् यत् २२ जनवरी दिनाङ्कः अस्माकं सर्वेषां सनातनधर्मस्य अनुयायिनां कृते सौभाग्यस्य दिवसः अस्ति, वयं सौभाग्यशालिनः स्म यत् अस्माकं पूर्वजानां बलिदानानन्तरं मर्यादा पुरुषोत्तमश्रीराममन्दिरस्य उद्घाटनं कर्तुं शक्नुमः। अस्मिन्नावसरे सुरेशजी, लालबाबूसिंहः, राजीवकुमारः दीपू चौरसिया, सोनूपाठकः, सुबोधयादवः, हनुमानदुबे, लालबाबू दुबे, सुभाषगुप्ता, आशुतोषकुमारः, राजू कुमारः, चंदनसिंहः, संजयचौरसिया इत्यादयः शतशः जनाः उपस्थिता अभवन् ।

# द्वितीये दिने एव समाप्ता टेस्ट प्रतिस्पर्धा भारतेन विजिता दक्षिण अफ्रीका विरुद्धं

## द्वितीया टेस्ट क्रिकेट स्पर्धा

### दक्षिण अफ्रीकादेशं सप्तस्तोभैः पराजितम् द्विप्रतिस्पर्धात्मिका श्रृंखला 1-1 तः समा।







**हिमसंस्कृतवार्ताः- डॉ. अमित शर्मा।** भारत- दक्षिण अफ्रीकादेशयोः मध्ये टेस्ट क्रिकेट श्रृंखलायाः केपटाउन नगरस्य न्यूलैंड्स क्रीड़ांगणे जायमाना द्वितीया प्रतिस्पर्धा भारतेन सप्तस्तोभैः विजिता। दक्षिण अफ्रीकादेशस्य प्रथमा पाली पञ्चपंचाशत् (55) धावनांकेषु एव समाप्ता। तदुत्तरे भारतस्य प्रथमा पाली त्रिपञ्चाशताधिक- एकशतम् (153) धावनांकेषु समाप्ता। भारतस्य पार्श्वे अष्टनवतिः (98) धावनांकानां अग्रता आसीत्। दक्षिण अफ्रीकादेशेन द्वितीयपाल्यां नवसप्तति- अधिक- एकशतम् (179) धावनांकाः अर्जिताः। भारतस्य पार्श्वे अन्तिमपाल्यां नवसप्ततिः (79) धावनांकानां लक्ष्यमासीत्। यत् भारतेन त्रिस्तोभहानौ प्राप्तम्। प्रथमपाल्यां दक्षिण अफ्रीकायाः काइल वेरिनः सर्वाधिकं पंचदश (15) धावनांकान् अर्जितवान्।

भारतस्य पक्षतः कन्दुकक्षेपणे प्रथमपाल्यां मोहम्मद सिराजेन, जसप्रीत बुमराह इत्यनेन, मुकेश कुमारेण च क्रमशः 6, 2, 2 च स्तोभाः प्राप्ताः।

भारतस्य प्रथमपाल्यां विराट कोहली सर्वाधिकं 46 धावनांकान् कृतवान्। दक्षिण अफ्रीकापक्षतः कन्दुकक्षेपणे प्रथमपाल्यां कागिसो रबाडा, लुंगी एन्गिडी, नन्द्रे बर्गर च 3-3 स्तोभान् प्राप्तवन्तः।

दक्षिण अफ्रीकायाः द्वितीयपाल्यां एडन मार्करम सर्वाधिकं 106 धावनांकान् कृत्वा स्वकीयं शतकं पूरितवान्। द्वितीयपाल्यां भारतस्य पक्षतः कन्दुकक्षेपणे जसप्रीत बुमराहः, मुकेश कुमारः, मोहम्मद सिराजः, प्रसिद्ध कृष्णा च क्रमशः 6, 2, 1, 1 च स्तोभान् प्राप्तवन्तः।भारतस्य द्वितीयपाल्यां यशस्वी जायसवालः सर्वाधिकं 28 धावनांकान् कृतवान्। अन्तिमायां पाल्यां दक्षिण अफ्रीकापक्षतः कन्दुकक्षेपणे कागिसो रबाडा, नन्द्रे बर्गर, मार्को यान्सनः च 1-1 स्तोभान् प्राप्तवन्तः। अनेन भारतेन इयं प्रतिस्पर्धा सप्तस्तोभैः विजिता। श्रृंखला च 1-1तः समा कृता। मोहम्मद सिराजः प्रतिस्पर्धायाः सर्वश्रेष्ठः क्रीडकः, जसप्रीत बुमराहः, डीन एल्गरश्च श्रृंखलायाः सर्वश्रेष्ठ- क्रीडकौ चयनितौ।

# देशस्य विंशतिः राज्यानां केन्द्रशासित-प्रदेशानां च क्रीडकाः प्रथम-बहुस्पर्धा-आयोजने सहभागं कुर्वन्ति




देशस्य विंशतिः राज्यानां केन्द्रशासित- प्रदेशानां च द्वादश- शताधिक- क्रीडकाः दीव इत्यत्र प्रथम-बहुस्पर्धा-आयोजने सहभागं कुर्वन्ति। दीवस्य घोटला-तटे क्रीडकाः अष्ट- क्रीडासु प्रतिभागं करिष्यन्ति, प्रधानमन्त्री नरेन्द्रमोदी आभाषीय माध्यमेन प्रतभागिनः सम्बोधयिष्यति, युवकार्यक्रमक्रीडामन्त्री अनुरागसिंह ठाकुरः मुख्यातिथिः भविष्यति ।

# परमा प्रेयसी श्रीराधा



श्रीभगवता परमात्मना स्वस्यैव क्रीडार्थं विश्वप्रकृतिः कल्पिता, रचिता च। प्रकृतिः नाम महाशक्तिः। इयं वैष्णवी मायाशक्तिः इति नाम्नापि ज्ञायते। इयमेव परमशक्तिः काले काले मानुषीरूपं स्वीकृत्य इहभूमितले अवतरति, एवञ्च नानाक्रीडां विरचति मानवादर्शाय। द्वापरयुगे तादृशी महती शक्तिः राधारूपेण इहभूमौ अवातरत्। वैश्यकुले वृषभानुः इति नाम्ना कश्चन प्रसिद्धः राजा बभूव। सः सर्वसम्पदाभिः सुसम्पन्नः, सर्वधर्मपरायणश्च आसीत्। तेन 'कीर्तिदा' इति नामधेया अनिन्द्यसुन्दरी एका गोपकन्या परिणीता, या च सम्पूर्णशुभलक्षणैर्युक्ता, एवं प्रतप्तस्वर्णप्रभावत् कान्तिमती आसीत्। वृषभानुः महान् भक्तः आसीत्। कीर्तिदायाः तपोबलप्रभावात्, विनयपराकाष्ठागतस्य कारणाच्च तस्य राधिका इति नामिका कन्या जाता। भाद्रपदमासस्य शुक्लपक्षस्य अष्टम्यां तिथौ, मध्याह्नकाले, अभिजिन्मुहूर्ते, अनुराधानक्षत्रयोगे कीर्तिदा राज्ञी राजचिह्नैः सुशोभिताम् एनां कन्यां प्रसूतवती। एतस्याः अङ्गप्रत्यङ्गादिकम् अत्यन्तं सुकुमारत्वं गतमासीत्, यस्माच्च चन्द्रमसः ज्योतिः निस्सरत् अवर्तत, यस्यां सौन्दर्यं त्रैलोक्ये हि अद्भुतं, सर्वदोषैः रहितञ्च आसीत्। यथा सच्चिदानन्दघनपरमात्मा श्रीकृष्णो नित्योऽस्ति, एवञ्च समये समये अस्मिन् भूमण्डले तस्य आविर्भाव-तिरोभावादिकं प्रचलति, तथैव प्रकारेण सच्चिदानन्दमयी भगवती श्रीराधापि नित्या वर्तते। वस्तुतः भगवतः हि निजस्वरूपशक्त्याः कारणतः सा भगवत्तः सर्वथा अभिन्ना, एवं काले काले लीलार्थं तस्याः अपि आविर्भाव-तिरोभावादिकं प्रचलति। सा लक्ष्मीरूपा, प्रकृतिरूपा, जगन्माता, महाशक्तिः च वर्तते। तस्याः रूपगुणलावण्यादिकं वर्णनातीतम्।

श्रीराधायाः पूजां विना मनुष्यः श्रीकृष्णपूजायाः अधिकारी नैव भवति। अतः समस्तभक्तैः अवश्यं श्रीराधार्चना कर्त्तव्या। श्रीराधा भगवतः श्रीकृष्णस्य प्राणानाम् अधिष्ठात्री देवी अस्ति। अतः भगवान् एतस्याः वशीभूतः वर्तते। एषा भगवतः रासक्रीडायाः नित्या अधीश्वरी वर्तते। श्रीराधां विना भगवान् क्षणार्थमपि स्थातुं नार्हति। सा सम्पूर्णकामनानां राधनं (साधनं) करोति, तस्मात् सा देवी 'श्रीराधा' उच्यते। वृन्दावनपरिसरे अवस्थिता श्रीवृषभानुपुरी (बरसाना) अथवा 'ननिहालरावलग्रामः' इति राधाक्षेत्रत्वेन सुविख्यातम्। सर्वदा श्रद्धालवः भक्ताः 'राधे राधे राधे' इति नाम उच्चारयेयुः आत्मकल्याणार्थमिति, शुभम्।

असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

# कोऽहम्?

## (उपोद्घातः)



कोऽहम्? (Who am I?) इत्येषः आत्मविचारणा- सम्बद्धः प्रश्नोत्तरसङ्ग्रहः अस्ति। ईसवीये १९०२ मध्ये श्री.एम्.शिवप्रकाशम्-पिल्लैमहाभागः एतान् प्रश्नान् भगवन्तं रमणमहर्षिं पृष्टवान्। पिल्लैमहोदयः तत्त्वज्ञानस्य पदवीधरः आसीत्। सः तदानीं अरकॉट्-जनपदस्य करसङ्कलनविभागे कार्यरतः आसीत्। कार्यवशात् एकदा १९०२ मध्ये सः तिरुवन्नमलैनगरं गतः। तत्र सः अरुणाचलपर्वते विरूपाक्षगुहायां भगवन्तं रमणमहर्षिं मिलितवान्। तदा गुरोः आध्यात्मिकं मार्गदर्शनम् अपेक्षमाणेन तेन महर्षेः सकाशात् आत्मविचारणामार्गम् अधिकृत्य केषाञ्चन प्रश्नानाम् उत्तराणि प्राप्तानि। भगवान् तदा मौनेनैव तिष्ठति स्म। अतः सः प्रश्नानाम् उत्तराणि इङ्गितेनैव दर्शयित्वा अथवा तेषाम् अर्थावगमाभावे लिखित्वा ददाति स्म।

मूलतः एते आहत्य चतुर्दश प्रश्नाः आसन्। तथापि अग्रिमसंस्करणेषु एषा सङ्ख्या अष्टाविंशतिपर्यन्तं वृद्धा। क्वचित् च प्रश्नान् अनिर्दिश्य निबन्धरूपेणापि तेषां लेखनप्रकाशने जाते स्तः।

कोऽहम्? (Who am I) तथा विचारसङ्ग्रहः (Self Enquiry) एतौ द्वौ एव साक्षात् भगवतः रमणमहर्षेः स्वीयशब्दैः निबद्धौ गद्यरूपौ उपदेशसङ्ग्रहौ स्तः। आत्मविचारणा इत्येव मुक्तेः साक्षात् (direct) मार्गोऽस्ति इति तयोः केन्द्रीभूतः उपदेशः। कोऽहम् इत्यस्मिन् ग्रन्थे सुगमतया एतस्य मार्गस्य विवेचनं कृतम् अस्ति। मनः विचाराणां समूहरूपम्। तेषु विचारेषु 'अहम्' इत्येषः प्रथमः विचारः। कोऽहम् इति विचारणा सातत्येन अनुष्ठिता चेत् विचाराः नाशं यान्ति। अन्ते 'अहम्' इति विचारः अपि नश्यति तथा च केवलम् आत्मनः अद्वैतबोधः अवशिष्यते। एवं अनात्मवस्तुभिः मनःशरीरादिभिः सह आत्मनः तादात्म्यं नश्यति; आत्मनश्च अपरोक्षज्ञानं भवति। एषा एव स्थितिः मौनशब्देन निर्दिश्यते।

श्री.अभिजित्-तोडकरः,
सुभाषितशिक्षणप्रमुखः,
संस्कृतभारती,पश्चिममहाराष्ट्रम्।

# शृगाल-कुक्कुटयोः कथा



हिमसंस्कृतवार्ताः
दिलीपः,संस्कृतशिक्षकः
शिक्षाविभागः हि.प्र.




कस्मिंश्चित् नगरे कुक्कुटशृगालौ मित्ररुपे निवसतः स्म । एकदा उभौ वने अन्नं अन्वेष्टुं निर्गच्छतः स्म । तयोः मध्ये घनिष्टा मैत्री आसीत् । शृगालस्य भक्षणयोग्यः किमपि आखेटम् दृष्ट्वा एव कुक्कुटः वृक्षमारुह्य विशेषस्वरेण शब्दायते स्म । कुककुटशब्दं श्रुत्वा अधः निगूढः शृगालः आखेटम् समीपम् आगच्छन्तं दृष्ट्वा तं आक्रमयति खादति च स्म । एवं शृगालः स्वस्य भोजन व्यवस्था करोति स्म ।

एकदा कुक्कुटः कुत्रचित् बहिः गच्छन् आसीत्। तदैव सः कण्टकगुल्मानां मध्ये आश्लिष्टः जातः। बहुप्रयत्लानन्तरमपि सः तत्तः निर्गन्तुं असमर्थः अभवत्। तस्मिन्नेव समये तस्य मित्र शृगालः अपि तत्र आगच्छति । कुक्कुटः शृगालम् प्रति प्रार्थयति यत् सः तस्य साहाय्यं कारयेत् येन सः स्वच्छन्दः भवेत् । कुककुटस्य प्रार्थना श्रुत्वा शृगालः अवदत् यत् - चेत् त्वम् भविष्ये मृगयायां सर्वदा साहाय्यं करिष्यसि? तदैव अहं तव रक्षणं करिष्यामि। कुक्कुटः अपि तस्य वचनं स्वीकरोति । शृगालः तस्य रक्षणं शीघ्रमेव कृत्वा तं दूरे नयति । अतः तौ परस्परं मित्रं भूत्वा समये समये परस्परं साहाय्यं कृतवन्तौ । एकस्मिन् दिने तौ ग्रामात् बहिः गच्छन्तौ आस्ताम्। सायंकालसमयः आसीत् । क्रमेण रात्रौ अन्धकारस्य प्रसारः आरभत् । तस्मिन्नेवावसरे कस्यचित् स्वरं श्रूयते श्रुत्वा च कुक्कुटः शीघ्रमेव उड्डीय वृक्षस्योपरि गत्वा शृगालं आखेटार्थं शब्दायते। कुक्कुटस्य उच्चक्रन्दनं श्रुत्वा आखेटम् च समीपस्थमेव मत्वा शृगालः तस्योपरि आक्रमणं कृतवान् । परन्तु सः आश्चर्यचकितः अभवत् । भयात् कम्पमानः जातः उक्तश्च भो ! एषः तु वनकुक्कुरोऽस्ति रे ! शृगालः वनकुक्कुरस्य उच्चैः बुक्कनेन भीतः विचलितश्चासीत् । अनुक्षणमेव वनकुक्कुरः शृगालस्योपरि आक्रमणं कृतवान् । कुक्कुटः असहायः दुखितश्चासीत्। अज्ञाने एव मया इदं किं कृतम् इति चिन्तयन् सः सर्वं केवलं पश्यन् आसीत् । किञ्चित्कालान्तरे एव कुक्कुटः शृगालं भूमौ पतितं मृतं च दृष्टम् । वनकुक्कुरेण निज तीक्ष्ण दन्तैः नखैश्च शृगालस्य ग्रीवा भङ्गिता। तं च वने कर्षितवान् । सद्यः एव रुदन् कुक्कुटः उड्डीय गृहम् आगतः । अन्यैः सर्वैः पशुभिः पृष्टः यत् अद्यतने तव मित्र शृगालः न दृश्यते कुत्रास्ति सः ? कुक्कुटः प्रति प्रश्नं करोति अवदत् च - " न जानेऽहम्। मयापि बहुदिनानि यावत् शृगालं न दृष्टवान्। अहं स्वयं चिन्तितोस्मि कुत्र गतः भविष्यति , मामपि विज्ञापयन्तु ?" सर्वे पशवः कुक्कुटस्य विषये शङ्किताः आसन् , परन्तु ते अपि शृगालस्य दुष्कर्मैः दुर्व्यावहारकारणेन अतीव दुःखिता एव आसन् । अतः सर्वे मौनाः एव अभवन् ।

**शिक्षा : समयस्य गतिः विचित्रास्ति यतोहि समये आगते सति आखेटकः एव आखेटः भवति ।**

# संस्कृतं प्रत्येकक्षेत्रस्य भाषा च वैज्ञानिकभाषा

## उपजिल्लाधिकारी उत्तरकाशी "श्रीब्रजेशकुमारतिवारी





"उत्तराखण्डं। उत्तरकाशी।संस्कृतभारत्याः गढवालसम्भागस्य आवासीयप्रबोधनकक्षायाः द्वितीयदिने उत्तरकाश्याः उपजिल्लाधिकारी श्रीब्रजेशकुमारतिवारी छात्राणां मध्ये गत्वा सर्वान् छात्रान् प्रोत्साहितवान्। संस्कृतभारत्याः प्रान्तीयसङ्गठनमन्त्री गौरवशास्त्री, डॉ. अरविन्दनारायणमिश्रः च संस्कृतभारतीग्रन्थं प्रस्तूय अभिनन्दनं कृतवन्तौ। उपजिलाधिकारिणा श्रीतिवारीवर्येण अवसरेस्मिन् सम्बोधितं यत् संस्कृतं न केवलं संस्कारस्य भाषा अपितु प्रत्येकस्य क्षेत्रस्य भाषा अस्ति, संस्कृतं सम्पूर्णतया वैज्ञानिकभाषा अस्ति तथा च संस्कृताध्ययनेन भवन्तः प्रशासनिकसेवासहितं प्रत्येकक्षेत्रे संस्कृतद्वारा देशस्य सेवां कर्तुं शक्नुवन्ति। श्रीविश्वनाथसंस्कृतमहाविद्यालये प्रबोधनवर्गस्य गढवालविभागस्य प्रायः सर्वेभ्यः जनपदेभ्यः १०० छात्राः संस्कृतभाषां शिक्षन्ते। अस्मिन् वर्गे प्रातःकाले जागरणात् आरभ्य रात्रौ निद्रां गमनपर्यन्तं ते निरन्तरम् संस्कृतभाषायां वार्तालापं कुर्वन्ति तथा च क्रीडायाः माध्यमेन ते संस्कृतभाषां शिक्षन्ति। वयं शिक्षमाणाः स्मः यत् क्रीडाद्वारा कथं संस्कृतम् आयाति । वर्गेस्मिन् राधेश्यामखण्डूरी, च वर्गाधिकारी , सर्वव्यवस्थाप्रमुखः डॉ. द्वारिकाप्रसादनौटियालः शिक्षकः कुलदीपमैन्दोला, डॉ. प्रदीपसेमवालः, नागेन्द्रव्यासः, डॉ. आनंदजोशी, डॉ. अनिलबहुगुणा, शुभमः, शिवानी , नरेशभट्टः, अभिषेकः , लवलेशदुबे च आदयः आसन् ।संस्कृतभाषा साधारणजनानां भाषा सम्भाषणद्वारा एव भवितुं शक्नोति - 'विधायकः श्रीसुरेशचौहानः'द्वितीयदिवसस्य द्वितीयदिवसे श्रीसुरेशचौहानः गंगोत्रीविधानसभायाः विधायकः वर्गं सम्बोधितवान् यत् संस्कृतभाषा साधारणजनानां भाषा सम्भाषणद्वारा एव भवितुं शक्नोति । सहैव पूर्वनगरपालिकाध्यक्षा सुधागुप्ता च अन्ये गणमान्याः समुस्थिताः अभवन्। सायंकाल सत्रे डा. अरविन्दनाराणमिश्रवर्येण वर्गार्थिनः सम्बोधिताः यत् सम्भाषणाय भाषा आवश्यकी च भाषां बिना न कश्चन समर्थः।मानवीयजीवाः वयं सम्भाषणशीलाः पशूनाम् अपि भाषा परन्तु सुसंस्कृता भाषा संस्कृतं मानवानाम् एव, एवं च कालखण्डे भाषान्तरं भवति। विचाराणां विनिमयः भाषाद्वारा एव भवति।संस्कृतं गौरवाय विषयोयम् अस्माकमिति ।